शारदा-नवीन-वर्षोत्सवः
(एकादश-वर्षे पदन्यासः)

समारोहाध्यक्षः
श्री. चि. गो. सहस्रबुद्धे
महाराष्ट्र-शिक्षण-संचालकः

समयः
बलिप्रतिपदा, सोमवासरे
दि. १० नोव्हेम्बर ६९
प्रातः ९-३०

स्थलम्
उद्यान-प्रासादः
पुण्यपत्तनम् ३०

सर्वे शारदोपासकाः समये
समुपस्थातुं सादरं प्राथ्यन्ते ।

संपादकः

१ कार्तिक १८९१
२३ ऑक्टोबर १९६९

शारदा

१८९१ दीपावली - नूतनवर्ष - शुभचिन्तनम् १९६९

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मध्यमवर्गस्य आर्थिकयक्षप्रश्नानां समाधानार्थं लघुव्यवसायानां प्रोत्साहनार्थं च शाखापञ्चदशीद्वारा अधिकोषक्षेत्रे प्रयतनशील: एक एव-अद्वितीय: नागरी सहकारी अधिकोष: ।

जनता सहकारी बॅङ्क लि. पुणें २.

(जनता सहकारी अधिकोष: मर्यादित:)

बाजीराव मार्ग:, पुण्यपत्तनम् २

स्थापना १९४९–
दूरवाणी ५६६४३
५८६३३, ५८८४६

द. शं. जमदग्नि
कार्यकारी संचालक:

****

बौद्धिकं मानसं चैव श्रमाधिक्यं यदा भवेत् ।
उत्साह-लाभ-वृद्धयर्थं सेव्यतां प्र श मं सदा ॥
जीवनसत्त्व-युक्तं (ब–१) दिव्यौषधं

प्र श म

आयुर्वेदीयौषधीनां शास्त्रशुद्धा विनिर्मिति: ।
नि:शङ्कं निश्चिता यत्र र स शा ला हि सा ध्रुवम् ॥

आ यु र्वे द् र स शा ला

पु ण्य प त्त न म् ४

शाखा-विस्तरः

सांगली-कोल्हापुर-बेळगांव-हुबळी-मुम्बई-अमरावती-नागपुर-इन्दौर
जोधपुर-दिल्ली-पुणें-तथा ताराचन्द हॉस्पिटल्–पुण्यपत्तनम् ११

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्रीशंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर १ कार्तिक १८९१

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् १० अङ्कः २४

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. ०-८०

मङ्गलं मङ्गलानाम् ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

नमस्तुङ्गशिरश्चुम्बि-चन्द्रचामरचारवे ।
त्रैलोक्य-नगरारम्भ-मूल-स्तम्भाय शम्भवे ॥

चन्द्राननार्धदेहाय चन्द्रांशु-सित-मूर्तये ।
चन्द्रार्कानलनेत्राय चन्द्रार्धशिरसे नमः ॥

संसारैक-निमित्ताय संसारैकविरोधिने ।
नमः संसाररूपाय निःसंसाराय शम्भवे ॥

स पातु वो यस्य जटाकलापे
स्थितः शशाङ्कः स्फुटहारगौरः ।
नीलोत्पलानाम् इव नालपुञ्जे
निद्रायमाणः शरदीव हंसः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्रीशाय जनतात्मने ।

अयं शारदाङ्कः शारदीयस्य दशमवर्षस्य चतुर्विंशतितमः अङ्कः । समाप्तम् अधुना दशमं वर्षम् । अग्रिमाङ्कः नूतनस्य एकादशवर्षस्य प्रारम्भाङ्कः । म. गान्धी-विशेषाङ्कः ।

गते दशवर्षात्मके काले किं साधितं 'शारदा-'कारैः? सांप्रतिक-विषयेषु स्वात्मा सुस्पष्टं प्रकटीकृतः । संस्कृत-विषये भवतु, चन्द्रारोहण-विषये वा अस्तु संस्कृतस्य सर्वविध-विषयाविष्करणं सामर्थ्यं स्फुटं साक्षात्कारितम् । दूरीकृतः भ्रमः यत् जीर्णं संस्कृतं, मृतं संस्कृतं, विनष्टं संस्कृतम् इति ।

संस्कृत-वाचक-वर्ग-निर्माणं प्रधानं प्रथमं च कार्यम् अत्यावश्यकत्वेन कर्तव्यं संस्कृत-प्रसारेच्छुभिः । 'शारदा'कारैः सखेदम् अत्र निवेद्यते यत् संस्कृतेतरसमाजे या श्रद्धा, या भक्तिः या च तीव्रसमुत्कण्ठा संस्कृत-प्रसारकार्यविषये अनुभूता सा (तथाकथित–) संस्कृतज्ञानां समाजे अभावेनैव विराजते । गलितधैर्यः, नष्टवीर्यः, समाप्वोत्साहः, दूरदृष्टिहीनः, भविष्यदुत्कर्षविषये सर्वदा दुर्मुखः नैराश्य-न्यूनगण्ड-ग्रस्तः इव दृश्यते संस्कृतसमाजः । तस्माद् एव किमपि कर्तुं कारयितुं वा न तस्य सिद्धता । अनेन महती खलु हानिः नवनिर्माण-क्षमस्य संस्कृत-साहित्यस्य । वाचकाभावे किं फलितं संस्कृतक्षेत्रे नवनवीन-प्रकाशनस्य ।

परम् अपवादभूतैः अङ्गुलिमात्रगण्यैः कैश्चन सुरगवीसेवकैः पठ्यते संस्कृतं, लिख्यते संस्कृतं प्रसार्यते च संस्कृतम् । एतेषु बहवः न प्रकृत्या संस्कृतज्ञाः । परम् अवश्यं ते संस्कृतप्रियाः । महती जिज्ञासा तेषां संस्कृत-ज्ञाने पठितुं साहिती-निर्माण-प्रयतने च । अयम् एव महान् आधारः 'शारदा-'काराणाम् ।

कामं तिष्ठन्तु दूरे ते सर्वे अहंमन्याः तथाकथिताः संस्कृतज्ञाः कूपमण्डूकवृत्तिं समाश्रित्य । परं यावत् जन-साधारण-हृदय-सिंहासने भगवती श्रद्धादेवी सुप्रतिष्ठिता विराजते तावत् नैव फिक्क्रियते 'शारदा'-कारैः । एतेषां श्रद्धा-रक्षण-संवर्धनम् एव जीवितकार्यम् इति नः श्रद्धा । तत् संपादयितुम् अहर्निशं सेवामहे ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

स्वायुषि 'शारदा'कारैः सुबोधसंस्कृतम् आश्रित्य आधुनिकविषयेषु (५००) पञ्चशत-व्याख्यानानां वाङ्मयी पुष्पमाला 'शारदा' देव्यै समर्पिता । संस्कृतस्य संस्कृतेश्च विषये शतशः लेखाः लिखिताः वार्ताश्च प्रकाशिताः संस्कृतेतर-दैनिक-वृत्तपत्रेषु । तेन महती जनजागृतिः संस्कृत-प्रसारण-विषये । शारदा-गौरव-ग्रन्थमालायां (२२) द्वाविंशति ग्रन्थरत्नानां प्रकाशनं कृतम् । लक्षार्ध-रूप्यकाधिकं द्रव्यं व्ययीभूतम् ।

वैदिक-समाज-विषये यत्र यत्र शक्यं तत्र तत्र सर्वत्र सामाजिकेषु शासने च श्रद्धां साकारीकर्तुं सर्वात्मना प्रयतितम् । परोत्कर्ष-विषये सदा असूया-मत्सर-ग्रस्ताः दीर्घ-द्वेषाः अन्तर्बाह्य-कृष्णाः केचन कुप्रसिद्धाः काशेयाः काश्मल्य-निर्माणेन 'शारदा'-काराणां विषये जनमानसे विराजितां श्रद्धा-विश्वास-भक्ति-त्रिवेणी-संगतां मन्दाकिनीं कलङ्कयितुं प्रयतनशीलाः श्रूयन्ते ।

गच्छ सूकर भद्रं ते वद सिंहो मया जितः ।
पण्डिता एव जानन्ति सिंह-सूकरयोर् बलम् ।

—इत्येव प्रत्युत्तरं तेषाम् ।

'शारदा' कारैः या यशःश्रीः संपादिता गतविंशतिवर्षात्मके काले तत्र परमेशानुग्रहः श्रीसद्गुरुप्रसादः सातत्येन (शारीरिकीं मानसिकीम् आर्थिकीं च हानिम् अविगणय्य) परिश्रमशीलता च इति त्रितयं निमित्तभूतम् । इदं विक्रमार्जित-सत्त्वम् । नेदं सूक्तासूक्तमार्गलब्धं कलङ्कितं विवाद्यं वा यशः मन्तव्यम् ।

निस्तेजस्कैः सतेजस्कानां यशोभङ्गार्थम् अवश्यं प्रयतनीयम् । तत्फलितं तु तेषाम् एव मुखभङ्गः । तेजस्विनां तेजोवृद्धिः ।

'प्राप्तं प्राप्तम् उपासीत' इति नयेन स्वजीवितव्रतं त्यक्तसर्वस्वैः 'शारदा'कारैः सर्वदा परिपाल्यते । अलं शङ्कया । यैः यैः येन येन मार्गेण सश्रद्धं साहाय्यम् आचारितं 'शारदा'-कार्ये तेभ्यः सर्वेभ्यः कृतज्ञतापुरःसरं धन्यवादाः । एतावन्तं कालं समग्रम् अर्जितं यशः भगवते श्रीसूर्यनारायणाय अर्घ्यदानम् इव सविनयादरं समर्प्यते— श्रीशाय जनतात्मने ।

* * *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तुका म्हणे १२ तुका वक्ति

दया तिचें नांव भूतांचें पाळण । आणिक निर्दळण कंटकांचें ॥१॥	परित्राणं च भूतानां दुर्जनानां च नाशनम् । यदेतत् तां दयां प्राहुर् दयालक्षणकोविदाः ॥१॥
पाप त्याचें नांव न विचारिता नीत । भलतेंची उन्मत्त करी सदा ॥२॥	अविचारेण धर्मस्य यत्किंचिद् रभसा नरः । उन्मत्तवत् सदा कुर्यात् तत् पापम् अभिधीयते।२॥
धर्मनीतीचा तो ऐकूनी वेव्हार । निवडीलें सार– असार तें ॥३॥	व्यवहारं समालोच्य धर्म-नीति-समाश्रयम् । सारासारविवेकोऽयं विहितो वर्तते मया ॥३॥
तुका म्हणे धर्म रक्षावयासाठी । देवासही आटी जन्म घेणें ॥४॥	धर्मसंरक्षणार्थाय अजस्यापि सतः प्रभोः । ग्रहणीयानि जन्मानि तुका वक्ति–युगे युगे ॥४
तुकारामः	— डॉ. ग. बा. पळसुले

बाबा-ताहेर-काव्यम्.... १२

बूर सूतह् दिलों हूँ ता बनालेम् ।
जें हिजराने गुलेरअना बनालेम् ॥
बषेम् बा बुलबुले षैदा बगुलषन् ।
अगर बुलबुल् न नाला मा बनालेम् ॥

आयात चंद्रवदनाविरहाग्निदग्धाः
संभूय कुर्म इह तद्विषये विलापम् ॥
यामो वयं परभृतं प्रति पुष्पवाट्याम् ।
सर्वे वयं तु विलपाम स चेन्नयाति ॥

१८-६-३१० गौळीपुरा
गौळा रामय्या वाडा, हैद्राबाद २

न्या. गुण्डेराव हरकारे
निवृत्तः सत्रन्यायाध्यक्षः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वृद्ध कवी

का उठता ? खाली बसा तरुण मण्डळी
  उपचार ठेविता कां हा ? समताच योग्य या स्थळीं
लोचनांत आदर दिसे न हा थोडका
  स्तुतिहून नसे स्नेहाची ही शान्त नजर गोड कां ?
म्हणण्याचा आग्रह नको, अहो, वृद्ध मी
  नव कवने ऐकायाची जरि हौस न झाली कमी
हृदयांत अतां झोपली स्फूर्तिनंदिनी
  जाहला पराक्रम मागे जरि थोर आमुच्या दिनीं
बदलली सृष्टि संपले दिवस आमुचे
  ही समुद्धारिणी क्रान्ती चालली प्रभूला रुचे
मी झालो पिकलें पान आणखी तुम्ही
  टवटवीत सुमनें नामी काव्याच्या कल्पद्रुमीं
गा क्षितिजीं तारे तुम्ही नवोदित पहा
  चालला लयाला माझा क्षीणांशु काव्य दीप हा
वा भाट उषेचे तुम्ही दिव्य पाखरें
  गा कान्तीची नव गाणीं सौन्दर्य दाखवा खरें
मज तुमचे आशागीत आज ऐकु द्या
  नसणार कदाचित् येथे मी उषा पहाया उद्या
राहोत पुराणें जुनीं देवळांत तीं
  स्थळ रुचे मला जिथ गाते नवमेद कवींची तती
ही जडता जडु पाहते न ही परिणती
  वर्धिष्णु बाल्य मज लाभे पुनरपि तुम्हा संगतीं
शारदा थोर माउली दिव्य आपुली
  अन् बाळे आपण सारी सोनुलीं तिची सानुली
नाचलो खेळलो पुरा, अतां भागलो
  मी मांडीवर आईच्या हा पहुडाया चाललों
परि नीज यावया गीत मधुर गा तुम्ही
  अन् मिटल्या डोळ्यांतूनीं गाळीन अश्रु दोन मी

माधव ज्युलियन

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वृद्धकविः

कुत उत्तिष्ठत सादरं, युवकसज्जनास्तरुणसज्जनाः ?
उपचाराद्योग्यतरा सा समता तु प्रतिभाति मे ॥
पर्याप्तो दृश्यादरो लक्षितो मया, लक्षितो मया,
किं स्तुतिवचनान्न प्रेयो स्नेहार्द्रं मधुरेक्षणम् ?
वृद्धोऽहं यद्यक्षमः काव्यलेखने, काव्यगायने,
नवकवनश्रवणोत्कण्ठा हृदये मे ननु वर्धते ॥
सुप्तेयं हृदयेऽधुना स्फूर्तिनन्दिनी, स्फूर्तिनन्दिनी
मत्प्रतिभाचरमोत्कर्षो यदि पुरा लोकविश्रुतः ॥
परिवर्तनशीला ध्रुवं संसृतिः सदा, संसृतिः सदा,
उत्क्रान्तिर्नियता लोके विधिनियमः स सनातनः ॥
गतवर्णो शीर्णश्छदस्त्वहं सांप्रतम्, अहं साम्प्रतम्,
प्रस्फुटितसुमानि भवन्तः कवितायाः कल्पद्रुमे ॥
वाक्क्षितिजे यूयं नवोदितास्तारकाः, दीप्ततारकाः,
प्रायो मे विलयीभूतः क्षीणांशुकाव्यदीपकः ॥
यूयं वा दिव्यद्विजा, उषाबन्दिनः, प्रभाबन्दिनः,
उत्क्रान्तिगीतिभिर्लोकः सच्छोभां वः पश्यतु ॥
युष्माकं चाशागीतमद्य गायत, अद्य गायत,
अहमुषादर्शनं कर्तुं स्थास्यामि परेद्युर्न वा ॥
पूजिताः पुराणाः सन्तु देवमन्दिरे, प्रत्नमन्दिरे,
नववेदगानकुर्वन्ती कविततिस्तु मे रोचते ॥
वृद्धत्वाज्जडतात्वियं, न सा परिणतिः, पुनः परिणतिः,
युष्माकं सहवासान्मे वर्धिष्णु-बाल्यमागतम् ॥
अस्माकं ननु शारदा मातृदेवता, मातृदेवता,
सा पुत्रवत्सला माता, अर्भकास्तु लघवो वयम् ॥
क्रीडितं, नर्तितं पुरा, सश्रमोऽधुना, सश्रमोऽधुना,
गच्छामि स्वपितुं क्रोडे निजमातुः क्लान्तस्त्वहम् ॥
स्वापयितुं मधुरं गीतमद्य गायत, अद्य गायत,
संतोषान्मम नेत्राभ्यां प्रापतेदिहाश्रुद्वयम् ॥

वाराणसी

कु. विमला देवधर

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वृद्धः कविः

किमर्थमुत्तिष्ठथ हे युवानः ? पुनश्च स्वस्थानमलंकुरुध्वम् ।
ब्रवीमि योग्या समता कवीनां व्यर्थांश्च मन्ये खलु चोपचारान् ।।

समादरो बिम्बितनेत्रमध्ये न चाल्पतोषाय तु मादृशानाम् ।
स्तुतेर्गरीयो मधुमित्रभावो यो दृश्यते स्नेहमये च नेत्रे ।।

मां प्रेरयध्वे न तु काव्यपाठे वृद्धो नरोऽहं हि जराभिभूतः ।
काव्यं नवं श्रोतुमनाः सदाऽहं काव्यामृतास्वादनतत्परोऽहम् ।।

सुप्तोऽधुना काव्यभरो मदीये चित्तेऽवसद्यत्र हि काव्यगंगा ।
पराक्रमाणां विगतो हि कालः समाप्यते वैभवकालशोभा ।।

सृष्टिश्च नूनं परिवर्तितेयं काव्यस्य कालो विगतोऽधुना मे ।
क्रान्तिश्च मन्ये प्रभुसंमतैषा विश्वं समुद्धारयितुं नियुक्ता ।।

पत्रं च पक्वं पतनोन्मुखोऽहं काव्यस्य पुष्पाणि नवानि यूयम् ।
तारागणा वा क्षितिजे प्रदीप्ताः क्षीणांशुकल्पो मम काव्यदीपः ।।

वैतालिका वा विहगाश्च यूयं, दिव्या उषायाः स्तुतिपाठका वा ।
सौन्दर्यशोभां ननु दर्शयन्तः क्रान्तेः सदा कूजत गीतमालाम् ।।

वाञ्छामि श्रोतुं भवदीयमद्य आशाप्रदं चेतनकारि गीतम् ।
द्रष्टुम् उषां चेन्नहि श्वो वसेयं नाकण्ठपानं हि भवेद्वराणाम् ।।

नूनं पुराणानि पुरातनानि देवालये तानि पठन्तु विप्राः ।
स्थानं तदेतन्ननु रोचते मे यस्मिन् हि नित्यं नववेदगानम् ।।

नूनं मदङ्गे जडता हि जाता मन्ये न चैषा परिपाकरूपा ।
वर्धिष्णु बाल्यं पुनरेव जातं युष्मादृशां संगमकारणेन ।।

श्रीशारदा नो जननीस्वरूपा बाला वयं कोमलचारुरूपाः ।
क्रीडन् पुराऽहं व्यथितोऽद्य खिन्नः क्रोडे जनन्याः स्वपितुं व्रजेयम् ।।

मां स्वापयन्तां मधुरैर्भवन्तः सानन्दगीतैर्नवमञ्जुगीतैः ।
निमीलितादवै मम नेत्रयुग्मात् द्वौ बाष्पबिन्दू पततां च भूमौ ।।

वाराणसी

सौ. कमला चुनेकर,

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

उत्तमपूरनगरे संस्कृत-दिनोत्सवः सुसम्पन्नः

दिनांक २७ ऑगस्ट १९६९

महाराष्ट्र सरकार निदेशेन 'श्री चैतन्य विद्यालय-ओतूर' इत्यत्र २७ ऑगस्ट १९६९ दिनाङ्के विद्यालयस्य भूतपूर्व मुख्याध्यापकाः श्री. वि. मो. थेटे महोदयानामध्यक्षतायां 'संस्कृतदिनोत्सवः' सानन्दं सोत्साहं संपन्नः ।

तस्मिन्नवसरे विद्यालयस्य संस्कृताध्यापकानां मध्ये श्री. गं. ना. दुबे महोदयानां संस्कृत-प्रास्ताविक-भाषणे सति प्रमुख-वक्तृभिः विद्यालयमुख्याध्यापकैः श्री. बा. ना. रुद्रे महोदयैः राजभाषायां संस्कृतदिनस्य महत्त्वं तदुपयोगिता च वर्णिता, अनन्तरं आचार्य पं. श्री. आ. वि. बोरकर साहित्यसुधाकर, दर्शनाचार्य (काशी) महोदयैः सुलभ-संस्कृत-भाषाया महती, तद् वैशिष्टयं तत्प्रसारोपायाश्चोपवर्णिताः ।

विद्यालयस्य संस्कृताध्यापकैः पं. श्री. दिनकर ल. बावीसकर-शास्त्री, पं. श्री. गं. ना. दुबेशास्त्री महोदयैः संस्कृत भाषायां संस्कृतस्य, तत्साहित्यस्य च वैशिष्टयं तदुन्नतिः तद्-ह्रास-कारणानि च उपवर्ण्य तद्-विकासाय संस्कृत-दिनस्य महत्त्वमुपदिश्य संस्कृत-प्रचारोपाया निर्दिष्टाः ।

अध्यक्षमहोदयैः पं. श्री. वि. मो. थेटे इत्याख्यैः संस्कृतस्य वैदिककालस्य महत्त्वमुपवर्ण्य तदुन्नत्युपाया निर्दिष्टाः । अनन्तरं श्री. गं. ना. दुबे महोदयैः समुपस्थितानां हार्दाभिनन्दनं कृते सति राष्ट्रगानम् अभूत् ।

प्रेषक :
गं. ना. दुबे
संस्कृताध्यापक :

चैतन्य विद्यालयः
ओतूर, ता. जुन्नर (पुणें)

सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ८=००

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्रीकन्याकुमारीक्षेत्रे संस्कृत-दिनोत्सवः

भारतभूः विजयताम् ।   संस्कृतभारत्यै नमो नमः ।   वन्दे मातरम् ।

'शारदा' सम्पादकेभ्यः

प्रणिपातपुरःसरं विज्ञापना—

भारतशासनेन श्रावणपूर्णिमा (१८९१) बुधवासरः २७ ऑगस्ट १९६९ संस्कृतदिनमहोत्सवः भारतवर्षे सर्वत्र सोत्साहं सम्माननीयः इति आदिष्टं ततश्च आदेशानुसारं गीर्वाणगौरवात् तथा च अस्मत्स्थानस्य संस्थापक-उपासनीसदगुरुमहाशयानां (तेषामपि सुमहती प्रीतिः गीर्वाण-गिरि) आज्ञावशात् श्रीउपासनीकन्याकुमारीस्थाने यथामति यथाशक्ति सम्पादितः संस्कृतदिनमहोत्सवः संक्षेपतः। तस्य भावार्थः लिख्यते। 'प्रेषणीयं संस्कृतदिनोत्सववृत्तं सपदि' इति तत्रभवदादेशमादृत्य। यदि तत्रभवतां दृष्टिपथमायाति अस्मात् वृत्तात् किमपि प्रकाशनार्हं विपरीतं वा तज्ज्ञापनेन अनुग्राह्या अहम्। उत्सवारम्भसुभाषितं अलङ्कृतिभूषित अर्थगौरवयुतं इदं पठितम्।

"वदनं प्रसादसदनं, हृदयं सदयं, सुधामुचो वाचः।

करणं परोपकरणं, येषां केषां न ते वन्द्याः।" पद्येन अनेन अस्मद्-सद्गुरुभ्यः पूर्वसूरिभ्यः संस्कृतवागुपासकेभ्यः नमो नमः इति सादरं नमनं विहितम्। भाषासु मुख्यायाः मधुरायाः दिव्यायाः गीर्वाणभारत्याः महत्त्व-ज्ञानार्थं सहेतुकं पद्यम् इदं पठितम्। यतः साधयति पद्यम् इदं अस्याः माधुर्यं लालित्यं आर्याणाम् आचारम् आर्याजुष्टं सज्जनप्राणिपातेन कृतज्ञता-ज्ञापकरूपम्।

बहोः कालात् आरभ्य यैः संरक्षितं इदं विद्याधनं हा हन्त हन्त! क्लेशः अधिकतरः तैः विसोढः तदर्थम्। निसर्गनिर्मितात् तथा च मानवनि-र्मितात् संकटात् संरक्षितम्। न एतावदेव। अपि तु मुद्रणकलायाः लेखन-कलायाश्च अभावात् गुरुकृपां संपाद्य दुष्करसेवाद्वारा संचितं धनम् इदं विद्याह्वम्। ततश्च आद्यं वाङ्मयं श्रुतिरिति ख्यातम्। सम्प्रति सङ्कट-ग्रस्तस्य अस्मद्राष्ट्रस्य नैव तरणोपायः विद्यते अन्यः अस्याः गीर्वाण-भारत्याः सेवां विना। ततश्च श्रुतेः कश्चित् अंशः विचारणीयः उक्तः अत्र सङ्कटमोचनार्थम् सत्वरम्। ब्राह्मणः वर्णानां गुरुपदम् अनेन एव

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

हितकाम्यया कृतेन श्रुतिवाङ्मयानुसारं राष्ट्र-संरक्षणेन जनशिक्षाप्रदानेन च प्राप । अन्योऽप्येवं कर्मकर्ता गुरुः एव ।

प्रमुदितेन चेतसा इदम् आशासे । यत् अधुना जनाः एतस्मात् संस्कृत-दिनमहोत्सवात् गृहीत्वा प्रेरणां, प्रेरणां राष्ट्रहितसम्पादयित्रीं आदास्यन्ति आचरिष्यन्ति, स्वयं सुखं अनुभूय अन्यान् सुखीकरिष्यन्ति । तस्मात् वेदमहार्णवात् उद्धृतानि कानिचित् ऋग्रत्नानि । येषां प्रकाशः अज्ञानतमः नाशयेत् । दर्शयेत् मार्गम् आचारितुं सुसुखं धर्म्यम् । यतः जनकल्याणार्थं यत् यत् क्रियते स यज्ञः यथा वेदाः यज्ञार्थम् अभिप्रवृत्ताः तथा जनहितार्थम् अपि तेषां महती प्रवृत्तिः ।

आसीत् पुरा राष्ट्रपुरोहितः राष्ट्रहितकरणे समर्थः चेतसा तद्धितेच्छुः च नवमाध्याये २३ मन्त्रे ' वयं राष्ट्रे जागृयाम पुरो हिताः ' पुरः हिताः अग्रे संस्थापिताः वयं राष्ट्रहितार्थं जागृताः अप्रमत्ताः स्मः ' इति वचः । राष्ट्रसंरक्षणार्थं स्वयं संशितव्रताः तपः तप्त्वा आदिशन् समये समये नृपं राज्यहितार्थम् । मानसिकी शारीरिकी शक्तिः सम्पादिता तैः तदर्थम् ।

' सं शितं मे ब्रह्म सं शितं वीर्यं बलम् ।

सं शितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः । ' यजु. अ. ११।८१
मया शास्त्रशुद्धाचरणेन स्वीयं ब्रह्मतेजः अतितीक्ष्णं कार्यकरं आहितं, तनु सामर्थ्यम् अतनुतां नीतम्, इन्द्रियाणि च निखिलानि कार्यक्षमतां प्रापय्य यस्य अस्मि पुरोहितः नृपस्य, तस्य क्षात्रतेजः जयशालि कृतं संरक्षणक्षमतां नीतम् । ' उदेषां बाहू अतिरमुद्वर्चो अथो बलम् ।

क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाँ अहम् । अहो महिमा अस्याः ऋचः स्वराष्ट्रसंरक्षणाय राष्ट्रीयवीरपुरुषाणां बाहव उग्राः मुखे वीरश्रीः शरीरबलं च सम्पन्नं स्यात्, राष्ट्रबान्धवाः उत्कर्षशिखरारूढाः, राष्ट्रविरुद्धाः रिपवः नश्येयुः । एवं मन्त्रसामर्थ्यम् उपयुक्तं मया (पुरोहितेन) । अहो बत सम्प्रति मन्त्रशब्दस्य ' मन्त्रि गुप्तपरिभाषणे ' अयं शब्दार्थः लुप्तः । केवलं पठ्यन्ते मन्त्राः इति मतिः सद्यस्तनानां जनानाम् । का कथा अहिताग्निना प्रार्थितस्य महर्षिजमदग्नेः प्रजापतेः कश्यपस्य इन्द्रादिदेवानां बाल्यादि अवस्थात्रयस्य ज्ञानं स्यात् प्रशंसान्विकम् । न खलु न खलु एता-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वदेव दैवदुर्विलासः लासयन्त्याः जनचेतः पुराकाले स्वीयार्थगौरवमाधुर्यादिना अस्याः देववाण्याः विलीयते । अपि तु अज्ञानस्य परां काष्ठां आरूढाः अभव्याः अस्याः भव्यतां अजानन्तः वस्तुतः अरमणीं स्वधिया रमणीं व्याक्रोशीं विदधते । यल्लेखने अपि क्लेशानुभूतिः 'यातु देवलोक इयं अधुना अकिञ्चित्करा मृतप्राया देववाणी' इति । इदं जनमतं शीघ्रातिशीघ्रं यातु देवलोकं न तु देववाणी । उपासनया च अस्याः शक्त्यनुसारं राष्ट्रकुशलं याचे तमेव देवं बुद्धिप्रदम् —

'सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत् ।

तत्रभवतां मार्गदर्शकात् लेखात् उद्धृतं किञ्चित्, प्रेरणा अपि संस्कृत-दिनसमारोहकरणाय लब्धा । ततश्च सर्वथा अनुग्राह्या उचितमनुचितं दर्शयित्वा ।

साकुरी (नगर) सुभद्रा उपासनी महाराज

रूप्यकाः ६५,०००

लिट्किझ् क्र. ५४ द्वारा जेतव्याः ।

प्रवेशपत्रिकाः रविवासरीयेषु प्रमुखेषु वृत्तपत्रेषु प्रकाश्यन्ते । प्रमुखनगरेषु प्रतिनिधयः सन्ति । स्वीक्रियन्तां तेभ्यः प्राप्तिपत्राणि प्रवेशपत्रिकाः च ।
पत्रेण प्रार्थितं चेत् लिट्क्विझ्-साप्ताहिकं विना मूल्यं प्रेषयामः ।

लिट्क्विझ् प्रायव्हेट लिमिटेड

अलङ्कारः, बालाराममार्गः, मुम्बापुरी ७

१५ भाषासु १८० प्रतिनिधयः २५५ वृत्तपत्रेषु विज्ञापनम् ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संस्कृतस्य कष्टा अपनेतव्याः

न. दिल्ली– २७ ऑगस्ट ६९

श्रीमता सी. आर्. स्वामीनाथेन संस्कृत-दिवस-समारोहस्य शुभावसरे मद्रासी-उच्चतर-माध्यमिक-विद्यालये लक्ष्मीबाई नगरे संस्कृत-भाषायां वदता स्व-हृदयस्योद्गाराः एवं प्रकटिताः —

" भारतस्य पातन्त्र्यकाले गोपालकृष्णगोखले-लोकमान्य तिलकः-महात्मागान्धी-प्रभृति-मान्य-नेतारः इदम् उद्घोषं कृतवन्तः यत् " अस्माकं माता–भारतमाता पारतन्त्र्य-शृङ्खलासु निगडिता वर्तते, अनेकानि च भुङ्क्ते । अतो मातृकष्टानि व्यपनेतुं सर्वैः मिलित्वा एकीभूय सा निर्बन्धना कर्तव्या । भारतमातरं प्रति तेषाम् अभ्यर्थनं श्रुत्वा पुरुषैः स्त्रीभिः बालकैः च पारतन्त्र्यविरुद्धः संघर्षः प्रारब्धः । अनेकानि भुक्त्वा च माता स्वतन्त्रा कृता ।

भारतमाता तु स्वाधीना संजाता । परम् अस्माकं संस्कृत-भाषा तदाधारा भारतीया संस्कृतिः परतन्त्रा भूत्वा मरणासन्ना वर्तते । भारतं विधातुं इदम् आवश्यकं जातं यत् वयं संस्कृतभाषायाः, या अन्यासां सर्वासां भाषाणां जननी वर्तते दुःखानि व्यपनयामः यतो हि संस्कृतं विना अस्माकं सस्कृतिरपि विनाशं यास्यति, भारतं च भारतं न भविष्यति ।

आगच्छत सर्वे पुरुषाः स्त्रियः बालकाश्च मिलित्वा संस्कृतमातुः कष्टानि व्यपनीय इमां स्वतन्त्रां च विधाय स्वप्राचीनं गौरवं प्राप्नुमः ।

स्मर्यताम् राष्ट्रदेवो भव त्वर्यताम्

राष्ट्ररक्षणार्थम् .... बलसंवर्धनम्
बलसंवर्धनार्थम्.......मिष्टान्नसेवनम्

सर्वोत्कृष्टमिष्टान्नार्थं सत्वरं द्रष्टव्याः

दूरवाणी] शर्मा स्वीट मार्ट [७२३२
दत्तमन्दिरसमीपे पुणे२.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संस्कृत-दिन-संयोजकः

लोकसभासदस्यः श्रीरघुवीरसिंहशास्त्री

संसत्-सदस्यः श्रीमान् रघुवीरसिंहः शास्त्री संस्कृतभाषायाः विद्वान् वेदानां च प्रकाण्डपण्डितो वर्तते। भवान् उत्तरप्रदेशात् लोकसभायै प्रतिष्ठितसदस्यो निर्वाचितः। अयं समाजसेवाव्यसनी, अतो हि देशस्य अनेकासु सामाजिक-संस्थासु सक्रियं योगं ददाति।

भवतः संस्कृते विशेषा रुचिः वर्तते। स्वतन्त्र-भारते संस्कृतस्य दुर्दशां वीक्ष्य श्रीमतां मनसि क्षोभः संजातः, संस्कृतं विकसितं समृद्धं च विधातुं सततप्रयासाय प्रेरणा जागृता। तस्या एव फलमिदं 'संसदीय-संस्कृत-परिषद्' विद्यते। अस्याः सदस्याः ते सर्वे संसत्-सदस्याः भवितुं शक्नुवन्ति, ये संस्कृतं विदन्ति संस्कृते च येषां रुचिः। भवता अनया परिषदा संस्कृतस्य स्थितिः समृद्धा, तां गौरवशालीपदे च प्रतिष्ठापयितुं संकल्पो विहितः।

श्रीमताम् एव प्रस्तावे श्रावणीपूर्णिमायां समस्ते देशे संस्कृत-दिवसः संयोजितः। भारतसर्वकारेणापि प्रस्तावम् इदं स्वीकृत्य तस्मिन् दिने 'वैदिक-सम्मेलनम्' आयोजितम्। भविष्यत्काले प्रतिवर्षं श्रावणीपूर्णिमायां भारते संस्कृत-दिवसः आयोजयिष्यते। अस्मै पुनीतकार्याय श्रीमन्तः शास्त्रिमहोदयाः वर्धापनयोग्याः।

* * *

राष्ट्रदेवपूजनार्थं बलोपासनम्। बलोपासनार्थं सात्त्विकान्नसेवनम्।

तदर्थं त्वर्यताम्

का का ह ल वा ई

१ दत्तमन्दिरम्, शुक्रवार-पुणें २. २ डेक्कन-जिमखाना, पुणे ४.

दूरवाणी ५७८६८ दूरवाणी ५७८६७

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुण्यपत्तन-नगर-छाटण-कार्यालयाय ७-११-६९ दिने समर्पितम्
शारदा-(पुण्यपत्तनम् ३०.) १०-२४ ★ रजि. क्र. एम्. एच्. ५५७
● लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

महाराष्ट्र-संस्कृत-परिषदः षष्ठं पुण्यपत्तनाधिवेशनम्

स्थलम्-पुणें(-अनाथ-)विद्यार्थी-गृहम्, सदाशिवपेठ, पुण्यपत्तनम् ३०

उद्घाटकः-श्री. श्री. पु. मराठे,
पोलीसकमिशनर, पुणें.

स्वागताध्यक्षः-म. म. प्रा. द. वा. पोतदार

अध्यक्षः-पं. महाव्याघ्र गोपालाचार्यः एम्. ए.

रात्रौ ९-३०-संगीतं भर्तृहरीयम् ।

स्थलम् - महाराष्ट्र-मण्डल-रङ्गभूमिः ।

प्रकटाधिवेशनं प्रस्तावादिचर्चा च

रविवासरे (१६।११।६९) मध्याह्ने २-३० तः २-३०

सर्वे शारदोपासकाः समुपस्थातुं साग्रहं प्रार्थ्यन्ते ।

दुर्गादत्त शर्मा	**वसन्त अ. गाडगीळ**	**दत्तो वामन पोतदार**
स्वागत-कार्याध्यक्षः	प्रधान-कार्यवाहः	स्वागताध्यक्षः

★ ★

शारदा-नूतन-(११)-वर्षारम्भः

भारत-राजधान्यां दिल्ली-नगरे राष्ट्राध्यक्ष-संनिधाने संपत्स्यते ।

विविध-साहितीमण्डितस्य—

महात्मा-गान्धी-विशेषाङ्कस्य प्रकाशनम्

सुनिश्चितं शारदा-नूतन-वर्षारम्भे ।

नूतनस्य एकादश-तम-वर्षस्य वार्षिकमूल्यं (रु. ८) सत्वरं प्रेष्यते चेत् वर्षारम्भ-विशेषाङ्कः विना मूल्यं प्राप्तुं शक्यते । —संपादकः

संपादकः मुद्रकः प्रकाशकः स्वामी - वसन्त अनन्त गाडगीळ
मुद्रणस्थलम्- यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् ३०.
प्रकाशनस्थलम्-१. म.म. प्रा.द.वा.पोतदार,४९८ शनिवार,पुण्यपत्तनम् ३०
२.- श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् ३०.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri